# A-I/1/22ABDS1CCTC1/23

## प्रथमसत्रार्द्धम्

## प्रथमपत्रम्

## बौद्धदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 2 (अङ्कः)=20**

1. तर्कभाषा नाम्ना कति ग्रन्थाः प्राप्यन्ते? के च तेषां रचनाकाराः?
2. बौद्धनैयायिकाः कति प्रमाणानि स्वीकुर्वन्ति? कानि च तानि?
3. बौद्धतर्कभाषाकारः कः?
4. बौद्धतर्कभाषायां कति परिच्छेदाः? के च ते?
5. प्रमाणशब्दस्य निर्वचनं लिखत।
6. 'मानसिद्धिः मेयाधीना' इति के स्वीकुर्वन्ति?
7. मीमांसकाः कति प्रमाणानि स्वीकुर्वन्ति? कानि च तानि?
8. प्रमेयद्वयं लिखत।
9. प्रत्यक्षप्रमाणस्य कति भेदाः? के च ते?
10. 'सौत्रान्तिकाः स्वसंवेदनं स्वीकुर्वन्ति' इति कथनं सत्यम् असत्यं वा?
11. प्रत्यक्षस्य विषयः कः?
12. कस्य महाविहारस्य आचार्यः बौद्धतर्कभाषाकारः?
13. सामान्यलक्षणं कस्य विषयः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **4 (प्रश्नः) × 5 (अङ्कः)=20**

14. बौद्धतर्कभाषाग्रन्थस्य मङ्गलपद्यं विलिख्य व्याख्या विधेया।
15. अधीतग्रन्थनयेन प्रमाणलक्षणं प्रतिपादनीयम्।

16. प्रत्यक्षस्य भेदान् विलिख्य योगिप्रत्यक्षं व्याख्यात।

17. अधीतग्रन्थनयेन प्रत्यक्षणं प्रतिपादनीयम्।

18. प्रमाणफलव्यवस्था का? विशदीकुरुत।

19. चार्वाकाभिमतानुमानाप्रामाण्यनिरसनं यथाग्रन्थनयेन क्रियताम्।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) × 10 (अङ्कः)=20**

20. बौद्धतर्कभाषाग्रन्थस्य तत्कर्तुश्च परिचयो देयः।

21. आचार्यधर्मकीर्तेः प्रमाणविषयकानां ग्रन्थानां परिचयो देयः।

22. बौद्धन्यायस्य वैशिष्ट्यं वर्णयत।

# A-I/2/22ABDS1CCTC2/23

## प्रथमसत्रार्द्धम्

## द्वितीयपत्रम्

## बौद्धदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 2 (अङ्कः)=20**

1. क्लेशैः भवार्णवे कः भ्रमति?
2. अभिधर्मकोशः कस्याः बौद्धपरम्परायाः ग्रन्थः?
3. कति असंस्कृतानि? कानि च तानि?
4. 'उपादानस्कन्धः' इत्यत्र 'स्कन्ध' इत्यस्य पदस्य कोऽर्थः?
5. पञ्चेन्द्रियाणि कानि?
6. अभिधर्मकोशस्य प्रतिज्ञावचनं किम्?
7. अभिधर्मकोशे कति कोशस्थानानि सन्ति?
8. वैभाषिकमतानुसारम् अविज्ञप्तिः संस्कृता असंस्कृता वा?
9. वैभाषिकमतानुसारं चत्वारि महाभूतानि कानि?
10. वैभाषिकमते निर्वाणं कतिविधम्?
11. वेदनायाः लक्षणं किम्? कतिविधाश्च वेदनाः सन्ति?
12. संस्कृताः धर्माः कति सन्ति?
13. रूपादिस्कन्धपञ्चकं किम्?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **4 (प्रश्नः) × 5 (अङ्कः)=20**

14. अष्टादश धातवः के? वर्णयत।
15. 'अभिधर्मः' इत्यस्य पदस्य कोऽर्थः? बौद्धग्रन्थेषु 'अभि' इत्ययं शब्दः केषु अर्थेषु व्याख्यातः?

16. प्रतिसंख्यानिरोधः यथाग्रन्थनयेन विवेचनीयः।

17. इमां कारिकां पूरयित्वा अस्याः व्याख्या अधीतग्रन्थदिशा कर्तव्या–

    धर्माणां प्रविचयमन्तरेण नास्ति.................. ॥

18. अविज्ञप्तिः विवेचनीया।

19. अभिधर्मकोशस्य मङ्गलपद्यं विलिख्य व्याख्या कर्तव्या।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) × 10 (अङ्कः)=20**

20. धातुकोशस्थानस्य विषयवस्तु किम्? वर्णयत।

21. अभिधर्मकोशकारस्य व्यक्तित्वं कृतित्वञ्च विलिख्य वैभाषिकदर्शनक्षेत्रे तस्यावदानं सम्यक्तया प्रतिपाद्यताम्।

22. अभिधर्मपिटकस्य परिचयो देयः।

# A-I/3/22ABDS1CCTC3/23

**प्रथमसत्रार्द्धम्**

**तृतीयपत्रम्**

**बौद्धदर्शनम्**

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

**खण्डः – क**

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 2 (अङ्कः)=20**

1. विज्ञप्तिमात्रतासिद्धिप्रकरणे कति ग्रन्थाः सन्ति?
2. आचार्यवसुबन्धुः आगमानुयायिविज्ञानवादी युक्त्यनुयायिविज्ञानवादी वा?
3. विज्ञप्तिमात्रतासिद्धिग्रन्थकर्तुः नाम लिखत।
4. युक्त्यनुयायिविज्ञानवादिनः कति विज्ञानानि स्वीकुर्वन्ति?
5. 'विज्ञप्तिमात्रतासिद्धिः' इत्यत्र 'विज्ञप्ति' अस्य पदस्य कोऽर्थः?
6. स्थिरमतिभाष्यं विंशतिकोपरि विद्यते वा त्रिंशिकोपरि?
7. नैरात्म्यद्वयं किम्?
8. चित्तमात्रतावादिनः परमाणुवादिनः अपरमाणुवादिनो वा?
9. योगाचारस्य अपरं नाम किम्?
10. कति बौद्धदर्शनप्रस्थानानि? कानि च तानि?
11. विज्ञानवादिनः सर्वधर्मनिःस्वभाववादिनो न वा?
12. विज्ञप्तेः नामपर्यायान् लिखत।
13. तृतीयधर्मचक्रप्रवर्तनं विज्ञानवादिमते नेयार्थदेशना नीतार्थदेशना वा?

**खण्डः – ख**

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **4 (प्रश्नः) × 5 (अङ्कः)=20**

14. विज्ञानवादिमतानुसारं परमाणुवादस्य आलोचनं कुरुत।
15. कारिकायाः व्याख्या कर्तव्या–

    रूपाद्यायतनास्तित्वं तद्विनेयजनं प्रति।

    अभिप्रायवशादुक्तमुपपादुकसत्त्ववत्॥

16. कारिकायाः व्याख्या कर्तव्या–

स्वप्नोपघातवत् कृत्यक्रिया नरकवत् पुनः।

सर्वं नरकपालादिदर्शने तैश्च बाधने॥

17. योगाचारदर्शनस्य वैशिष्ट्यं लिखत।

18. आगमानुयायिविज्ञानवादिनां वैशिष्ट्यं लिखत।

19. कारिकायाः व्याख्या कर्तव्या –

न तदेकं न चानेकं विषयः परमाणुशः।

न च ते संहता यस्मात् परमाणुर्न सिध्यति॥

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) × 10 (अङ्कः)=20**

20. विज्ञप्तिमात्रतासिद्धिप्रकरणकर्तुः देशकालकृतीनां परिचयपूर्वकं योगाचारदर्शनक्षेत्रे तस्यावदानं सम्यक्तया प्रतिपाद्यताम्।

21. विंशतिकायाः प्रतिपाद्यविषयः कः? वर्णयत।

22. विज्ञप्तिमात्रतासिद्धिग्रन्थस्य वैशिष्ट्यं लिखत।

# A-I/4/22ABDS1CCTC4/23

## प्रथमसत्रार्द्धम्

## चतुर्थपत्रम्

## बौद्धदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 2 (अङ्कः)=20**

1. अभिधम्मत्थसंगहो ग्रन्थस्य मङ्गलपद्यं लिखत।
2. पाठ्यग्रन्थस्य मङ्गलपद्ये कस्य अभिवादनम् अस्ति?
3. कतिविधः परमार्थः? पाठ्यग्रन्थदिशा लिखत।
4. चित्तस्य लक्षणं किम्? पाठ्यग्रन्थदिशा लिखत।
5. रूपं किम्?
6. चतुर्विधं चित्तं लिखत।
7. कति लोभसहगतचित्तानि?
8. कति अहेतुकचित्तानि?
9. कति सोभनचित्तानि?
10. कति रूपावचरसोभनचित्तानि?
11. अभिधम्मत्थसंगह–ग्रन्थस्य रचना केन कस्मिन् च देशे कृता?
12. कति अरूपावचरसोभनचित्तानि?
13. अभिधम्मत्थसंगह–ग्रन्थे कति परिच्छेदाः सन्ति?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **4 (प्रश्नः) × 5 (अङ्कः)=20**

14. स्वस्मृत्या पाठ्यग्रन्थात् एकां गाथां विलिख्य सम्यक्तया व्याख्यां कुरुत। या गाथा पत्रेऽत्र नागता स्यात्।
15. अकुशलचित्तानि विवेचयत।

16. अरूपावचरकुशलचित्तानि वर्णयत।

17. व्याख्या करणीया –

सत्ताकुसलपाकानि पुञ्ञपाकानि अट्ठधा।

क्रियाचित्तानि तीणीति अट्ठारस अहेतुका॥

18. कामावचरकुसलचित्तानि वर्णयत।

19. रूपावचरकुसलचित्तानि लेखनीयानि संक्षेपेण।

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **2 (प्रश्नः) × 10 (अङ्कः)=20**

20. अभिधम्मत्थसंगह-ग्रन्थस्य महत्त्वं वैशिष्ट्यञ्च वर्णयत।

21. पाठ्यग्रन्थदिशा चित्तस्य वर्णनं विस्तरेण कुरुत।

22. आचार्य-अनुरुद्धस्य व्यक्तित्वं कृतित्वञ्च लेखनीयम्।